# Appendix - 06

## Some Abstracts from Puñjarāja

### सारस्वत - पुंजराजी टीका।

ऐं सरस्वत्यै नमः ॥

**आनंदैकनिधिं देवमंतरायतमोरविम्।**
**दयानिलयिनं वन्दे वरदं द्विरदाननम्॥१॥**
**वाग्देवतायाश्चरणारविन्दमानन्दसान्द्रे हृदि सन्निधाय।**
**श्रीपुंजराजः कुरुते मनोज्ञां सारस्वतव्याकरणस्य टीकाम्॥२॥**

इह ग्रन्थस्य कर्ता निरंतरायमीप्सितार्थसिध्यै शिष्टाचारप्रतिपालनाय च इष्टदेवता-नमस्काररूपमंगलाचरणपूर्वकं श्रोतृप्रतिपत्तिद्वारा सप्रयोजनं चिकीर्षितं प्रतिजानीति।

**प्रणम्य परमात्मानं बालधीवृद्धिसिद्धये।**
**सारस्वतीमृजुं कुर्वे प्रक्रियां नातिविस्तराम् ॥इति॥**

तत्र परमात्मानं प्रणम्य बालधीवृद्धिसिद्धये सारस्वतीं नातिविस्तरां प्रक्रियाम् ऋजुं कुर्व इत्यन्वयः। प्रक्रियन्ते प्रकृतिप्रत्ययादिविभागेन व्युत्पाद्यन्ते शब्दा अनयेति प्रक्रिया। सरस्वत्या प्रणीता या प्रक्रिया सा सारस्वतीं प्रक्रियाम् ऋजुं प्रयोगानुकूलसूत्रक्रमां कुर्वे। प्रक्रिया हि सूत्रपाठक्रमेण नार्जवमुपयाति। अतस्तं क्रममुसृज्य यत्रतत्रस्थितानां सूत्राणां मीलनेन ऋजुं सरलां कुर्वे इत्यर्थः। किं लक्षणां सारस्वतीं प्रक्रियाम्? नातिविस्तरां न विद्यते अतिविस्तरः शब्दबाहुल्यं यत्र सा नातिविस्तरा तां नातिविस्तराम्। एतेन शब्दबाहूल्यमेव निरस्तं नार्थबाहुल्यं सूत्रशब्दस्य विस्तर इत्युक्तत्वात् अल्पपदा बह्वर्था प्रक्रियेत्युक्तं भवति। किं कृत्वा ऋजुं कुर्व इत्याह। परमात्मानं प्रणम्येति। अततीत्यात्मा परमश्चासावात्मा च परमात्मा स जगद्व्यापको विष्णुरेव, पूतात्मा परमात्मा चे(2) ति सहस्रनाममध्ये पठितत्वात् तं प्रणम्य प्रकर्षेण कायवाङ्मनोभिर्नत्वा। अत्र प्रकर्षे वाचिनः प्रशब्दस्य प्रथमं प्रयोगो मंगलार्थश्चोपलक्ष्यते। मंगलाचरणं तु शिष्टाचाररूपम्। यथा नित्ये शब्दार्थसम्बन्ध इति वक्तव्ये सिद्धे शब्दार्थसम्बन्ध इत्याह स्म कात्ययनः। यथा च वृद्धिरादैजि (१.१.१) त्यत्र वृद्धिशब्दमादौ प्रयुक्तवान् पाणिनिः। एवमिहापि ग्रन्थादौ प्रशब्दप्रयोगप्रयोजनमाह। बालधीवृद्धिसिद्धये इति बलन्ति चलन्ति दुर्बोधार्थादिति बालाः अव्युत्पन्नाः तेषां धीवृद्धिर्व्युत्पत्तिः तस्याः सिद्धिर्निष्पत्तिः। तस्यै सारस्वतीं प्रक्रियां ऋजुं कुर्व इति वाक्यार्थः। बाला व्युत्पादकस्य ग्रन्थस्य परार्थत्वेपि

तन्निर्माणसमुत्पन्न(2A)सुकृतरूपस्य फलस्य आत्मगामित्वात् कुर्व इत्यात्मनेपदप्रयोगो युक्त एव। नातिविस्तरामिति नाकादित्वान्नाञाऽनादेश्यभावः। अथवा न इति निषेधोऽर्थो निपातः। तेन सह समासः। अरण्यानी स्थानं फलनमिति नैकद्रुमवनमित्यादिप्रयोगदर्शनात्। केचित्तु नेति पृथक्चेदमेव मन्वते। अत्रैके सरस्वत्या प्रणीतानि यानि सूत्राणि तानि सारस्वतानि तत्सम्बन्धिनी प्रक्रिया सारस्वतीति व्युत्पत्तिं समाश्रयन्ते। तन्मतं छप्रत्ययस्य दुर्निवारत्वादुपेक्षणीयम्। तथा सति सारस्वतीयेति भवितव्यम्। बालानां धीः तस्याः वृद्धिरिति विग्रहे तादृश्यो मूढधियो वृद्धिरुक्ता भवेत्। तस्मात् बालानां धीवृद्धिर्व्युत्पत्तिरित्येव युक्तम्। सारस्वतीं प्रक्रियामहं कुर्व इत्युक्ते परकृतायाः स्वयंकरणनुपपन्नम्। तस्मात् प्रक्रियामनूद्य ऋजुत्वं विधेयम्। अथ नवीनामेव सारस्वतीसमाख्यां प्रक्रियां कुर्व इति कश्चिदाह। तन्मते सूत्रसप्तशती यस्मै ददौ साक्षात्सरस्वती। अनुभूतिस्वरुपाय तस्मै श्रीगुरवे नम इति नागेन्द्रपुरीश्रीचरणैरुक्त्वात्। इतीह विरोधः स्यात्। तस्माद्यथाविहितमेव साधीयः अत्र प्रक्रियार्जवं विषयः। तेन बालधीवृद्धिः प्रयोजनम्। हेतुहेतुमद्भावः। सम्बन्धः जिज्ञासुरधिकारी इति विषयाद्यनुबन्धचतुष्टयं वेदितव्यम्॥छ॥१॥

ननु विस्तरः कथं निरस्तो यस्मिन्सति साकल्येन शब्दज्ञानंस्यात् इति शंकामपाकर्तुमाह।

**इन्द्रादयोऽपि यस्यान्तं न ययुः शब्दवारिधेः।**
**प्रक्रियां तस्य कृत्स्नस्य क्षमो वक्तुं नरः कथम्॥इति इन्द्रादयः॥**
**इन्द्रश्चन्द्रः काशकृत्स्नाऽपिशली शाकटायनः।**
**पाणिन्यमरजैनेन्द्रा इत्यष्टौ आदिशाब्दिकाः॥**

वैयाकरणा अपि यस्य शब्दवारिधेः शब्दसमुद्रस्य वारिणो धीयन्ते यस्मिन्निति वारिधिः समुद्रः। तस्य पारम् अन्तम् इयत्तया परिच्छेदं वा न ययुर्न प्रापुः। तस्य कृत्स्नस्य समग्रस्य प्रक्रियां वक्तुं नरोऽर्वाचीनो मनुष्यः कथं क्षमः समर्थो भवतीत्यध्याहार्यम्। अयमभिप्रायः। इन्द्रादयामहानुभावा अपि लौकिकानां वैदिकानां च शब्दानां साकल्येन प्रतिपादने शक्ता न बभूवुर्मम पुनः का कथा? एवं सति किं बाला व्याकुलीकरणकारणे न वृथा विस्तार(2B)णेति प्रकृतिप्रत्ययादिना कतिपयशब्दसाधनमार्गदर्शनेन बालव्युत्पत्तिसिद्धये नातिविस्तरतयैव प्रक्रियायाः ऋजुकरणं युक्तमिति। एतेन प्रतिपदं पाठोऽपि निरस्तः। उक्तं हि- "बृहस्प[ति]रिन्द्राय यदि दिव्यं वर्षसहस्रं प्रतिपदपठितानां शब्दानां पारायणः(णं) प्रोवाच।" बृहस्पतिर्वक्ता इन्द्रश्चाऽध्येता दिव्यं वर्षसाहस्रमध्ययनकालः। तथापि नान्तं जगामेति। तस्माद्यथोक्तप्रकारेणैव प्रक्रियाम् ऋजुं कुर्वे इति श्लोक द्वयतात्पर्यार्थः॥२॥

संज्ञाविधानमन्तरेण प्रक्रियाक्रमो बालै बोध इति अभिधाय समानं संज्ञासंग्रहं प्रतिजानीति। तत्र तावत् संज्ञाव्यवहाराय संगृह्यते इति तत्र तस्यां प्रक्रियायां तावत् आदौ संव्यवहाराय प्रक्रियोपयुक्ताय सम्यग्व्यवहाराय संज्ञा अभिधा संगृह्यते। अल्पाक्षरैर्बह्वर्थकथनं कलनं यथा स्यात्तथा गृह्यन्ते इत्यर्थः। संव्यवहाराय हि संज्ञानिबन्धनमिति। संव्यवहारार्थं संग्रहो युक्त एव। तावच्छब्दः प्रसक्तेभ्यः सन्धिकार्यादिभ्यो व्यवच्छेदार्थो ज्ञेयः।

तत्र अनादिवृद्धिपरिगणितस्वरव्यंजनक्रममनवलम्ब्य समानसंज्ञासूत्रं प्रणयति।

**१. अ इ उ ऋ लृ समानाः ॥१.१॥**

अ। इ। उ। ऋ। लृ समानाः। इति षट्पदं सूत्रम्। यदि वृद्धिपदं स्यात् तर्हि प्रथमं पदं पंचवर्णात्मकम्। तत्र द्वन्द्वसमासः। तथा सति नित्य एव सन्धिः स्यात्। उक्तं हि-

**संहितैकपदे नित्या नित्या धातूपसर्गयोः।**
**नित्या समासे वाक्ये तु सा विवक्षामपेक्षते ॥इति।**

तद्दोषपरिहारार्थं पंच वर्णाः पंचैव सांकेतिकानि पदानि षष्ठं समाना इति। एवं षट्पदं सूत्रं शिष्टा मन्वते। सूत्रं हि वाक्यरूपम्। वाक्यं पदसमुदायात्मकम्। पदं च विभक्त्यन्तमेवेति पदत्वसिध्यै विभक्तिः कल्पनीया। तस्मादिह प्रतिवर्णं प्रथमैकवचनं सिरवसेयः। छन्दोवत् सूत्राणि भवन्तीति सूत्राणां छन्दस्त्वात् छान्दसः सिलोपो ज्ञातव्यः। अथवा अकारादिवर्णानां संकेतितेनाऽव्ययत्वेन विभक्तिलोपः। निव्यूढां हि लौकिकप्रयोगनिष्पत्तये संकेतमात्रत्वेमा(ना)माचार्येण।

**सूत्रे विभक्तिर्नैवास्ति वृत्तो सा यत्र दृश्यते।**
**एक-द्वित्व-बहुत्वेषु तत्सांकेतकमुच्यते॥**

सूत्रार्थं विवृणो(ति)। अनेन प्रत्याहारग्रहणाय(3A)वर्णाः परिगण्यन्ते तेषां समानसंज्ञा विधीयते इति अनेन अ इ उ ऋ लृ समाना इति सूत्रेण प्रत्याहारग्रहणार्थं वर्णाः एत एव परिगण्यन्ते परिपाट्या प्रकाश्यते। परिगणितानां च तेषां समानसंज्ञा विधीयते। विधीयत इति विधानसामर्थ्यात् संज्ञामुख्याऽवर्णपरिगण(नं) तु संज्ञाविधानागमागतमेवेति न वाक्यभेददोषः। प्रधाभेदे हि भेदः संपद्यते। अथवा सकृदुच्चारिता एव अ इ उ ऋ लृ वर्णाः वर्णपरिगणने समानसंज्ञाविधाने वर्तन्तेऽत्रैवोपयुज्यन्ते इति न वाक्यभेददोषः। तथा चोक्तं भर्तृहरिणा-

**आवृत्तिशक्तिभिन्नार्थे वाक्ये सकृदपि श्रुते।**
**लिंगाद्वा तन्त्रधर्मादौ विभागो व्यवतिष्टत॥**

इति प्रत्याहारग्रहणमपि संज्ञारूपत्वात् तदौपयौगिकत्वाच्च वर्णपरिगणनस्य वर्णपरिगणनं संज्ञासंग्रहमध्येनाऽकाण्डताण्डवमिति मन्तव्यम्। समाना इति बहुवचननिर्देशात् अ इ उ ऋ लृ षु प्रत्येकं समानसंज्ञाऽभिधीयते। एकाकारप्रत्ययाभावः संकेताद् बाहुलकाद्वा सिद्धः।

अ इ उ ऋ लृ इत्यत्राऽसन्धेः एक एव विवक्षाकारणमाह। नैतेषु सन्धिरनुसंधेयोऽविवक्षितत्तवात्। विवक्षितस्तु संधिर्भवतीति नियमात्। एतेषु उक्तं वक्ष्यमाणेषु सूत्रेषु संन्धिर्नाऽनुसन्धेयः। कस्मात्? अविवक्षितत्वात्। वक्तुमिष्टं विवक्षितं तस्य भावो विवक्षितत्वम्। न विवक्षितत्वम् अविवक्षितत्वम्। तस्मात् अ इ ए, ए अय, उ वम् ,इत्यादि सूत्रैः सन्धौ (अ)विहिते अय्व्लादयः समानसंज्ञा मा भूदित्यत्राऽविवक्षितत्वम्। तु पुनः विवक्षित एव सन्धिर्भवतीति नियमः। तस्मादपि सन्धिर्न कार्यः। हेत्वन्तरमाह- लौकिकप्रयोगनिष्पत्तये समयमात्रत्वाच्चेति। लौकिकप्रयोगाणामनादिवृद्धप्रयोगाणां निष्पत्तये व्युत्पादनाय यत्समयमात्रत्वं संकेतमात्रत्वं तस्माच्च सन्धिर्न कार्यः। केवलं समयमात्रं तस्य भावस्तत्वं तस्मात्। अथवा लोके भवाः लौकिका बालाः तेषां प्रयोगनिष्पत्तिर्व्यत्पत्तिस्तस्यै। इह बालाप्युत्तत्यर्थं संकेतमात्रत्वमस्तीति। एतेषु सूत्रेषु सन्धिर्न कार्यः इत्यर्थः। बालव्युत्पत्त्यै परिगणिते प्रकारादिषु सांकेतिकविभक्त्या पदत्वमिति समयमात्रत्वं स्पष्टमेव। यथा आदिति तिकृत्वा करणं पाणिनेरिच्छा संकेतस्तथाऽत्रापीऽति मन्तव्यम्। समानप्रदेशाः, समाना (3-b)द्धेर्लोपोऽधातोरित्येवमादयः। ननु यथा परिगणितानामेव अ इ उ ऋ लृ वर्णानां समानसंज्ञाविधानात्। नद्यादिषु दीर्घेकारस्य समानसंज्ञाभावात्। अम्शशोरस्येत्यकारलोपो न स्यात्। तेन रुपसिद्धिर्न भवेदित्येतदर्थे सूत्रान्तरमवतारयति॥१॥

२. **ह्रस्व-दीर्घ-प्लुत-भेदाः सवर्णाः॥१.२॥**

इति सूत्रार्थं विवृणोति। एतेषां अ इ उ ऋ लृ वर्णानां ह्रस्वदीर्घप्लुतरूपा भेदाः परस्परमन्योन्यं सवर्णा भण्यन्ते उच्यन्ते। विजातीयेषु ह्रस्वदीर्घप्लुतेषु सावर्ण्यं निषेद्धुं परस्परमित्युक्तम्। समानानामेव ह्रस्वदीर्घप्लुतभेदाः सवर्णा इति तज्ज्ञापयितुम् एतेषामित्युक्तम्। अन्यथा हराय इत्यत्र सवर्णे दीर्घः सहेत्यस्य प्राप्तिः स्यात्। वृत्तिकृतापि अवर्णवर्जाः स्वराः इवर्णो यत्वमुवर्णो वत्वमित्यादि यकारादिषु वर्णव्यवहारमनुसंधाय वर्णग्रहणे ग्रहणमिति परिभाषा समर्थिता। एतेष्वेव ह्रस्वादिभिरपरस्परं समानत्वात् समानसंज्ञायामन्वर्थतामवसीयत इत्याशयः।

ननु ह्रस्वादीनां सावर्ण्यमुक्तं ते त्वनुपदिष्टाः कथं बालैर्ज्ञातव्या इत्यत आह। लोकाच्छेषस्यसिद्धिरिति वक्ष्यति। ततो लोकत एव ह्रस्वादिसंज्ञा ज्ञातव्या। लोकाच्छेषस्य सिद्धिर्यथा मातरादेरिति सूत्रेण भगवती सरस्वती लोकाच्छेषस्य अनुक्तस्य सिद्धिर्लोकादिति शास्त्रान्ते तस्मात् लोकत एव ह्रस्वादिसंज्ञा आदिशब्दादुदात्तादीनामपि संज्ञा ज्ञातव्याः। लोकतः प्रसिध्य(द्ध) एव ह्रस्वादिसंज्ञा बालव्युत्पत्त्यर्थमनुवदति। एकमात्रो ह्रस्वः। द्विमात्रो दीर्घः। त्रिमात्रः प्लुतः इति। उक्तं च शिष्य(क्षा)याम्-

**एकमात्रो भवेद् ध्रस्वो द्विमात्रो दीर्घ उच्यते।**
**त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं त्वर्धमात्रिकमिति॥**
**चाषस्तु वदते मात्रां द्वितीयां वायसो वदेत्।**
**तृतीयां च शिखी ब्रूयात् नकुलस्त्वर्धमात्रकमिति॥**

ह्रस्वादीनामवान्तरभेदानाह-

एषामन्येऽप्युदात्तादि भेदा इति।

एषां ह्रस्वादीनामन्येऽप्युदात्तादिभेदाः सन्तीति शेषः। तस्य रूपमाह उच्चैरुपलभ्यमान उदात्तः। नीचैरनुदात्तः। समाहारः स्वरितः। इति उच्चैः स्थानैः उच्चार्यमाणतया उपलभ्यमानो वर्ण उदात्तः। नीचैः स्थानैः उच्चार्यमाणतया उपलभ्यमानोऽनुदात्तः। उदात्ता(4A)नुदात्तयोः समावृत्तिः समाहार स्वरित इति उच्यते। क्वचित्समवृत्या स्वरित इति पठन्ति। तथा तु ह्रस्तस्वरे समावृत्तिर्ग्राह्या। अत्र उच्चतानीचते तु इष्टस्थानापेक्षया ज्ञातव्यम्। अन्यथाऽतिप्रसंगदोषो भवति। ह्रस्वः, सवर्णे दीर्घैः सह, दूरादाह्वाने च टेः प्लुतः इत्यादयो ह्रस्वादिसंज्ञाप्रदेशाः॥२॥

## ३. एऐओऔ सन्ध्यक्षराणि॥१.३॥

पंचपदसूत्रं पूर्ववत्। अनेन प्रत्याहारग्रहणाय वर्णाः परिगण्यन्ते। एषां सन्ध्यक्षरसंज्ञा च विधीयते। अत्र सूत्रस्य वाक्यत्वादविवक्षितत्वे न सन्धिः। छन्दस्त्वेन सिलोपः। अकारस्य इकारेण एकारेण उकारेण ओकारेण च सन्धौ क्रमेण ए ऐ ओ औ सन्ध्यक्षरसंज्ञाऽन्वर्था ज्ञेया। एषां ह्रस्वा न सन्तीति। ए ऐ ओ औ एषां सन्ध्यक्षरत्वात् ह्रस्वा न सन्ति। दीर्घादयः सन्त्येवेत्यभिप्रायः। समानानां सन्ध्यक्षरणां संज्ञान्तरमाह॥३॥

## ४. उभये स्वरा॥१.४॥

द्विपदं सूत्रम्। अकारादयः पंच। अ इ उ ऋ ऌ एकारादयश्चत्वारो ए ऐ ओ औ एवम् उभये उभयप्रकाराः स्वराः स्वरसंज्ञा उच्यन्ते। स्वराणामवर्णवर्जितानां संज्ञान्तरमाह॥४॥

## ५. अवर्जा नामिनः॥१.५॥

इति अवर्णं वर्जयन्तीत्यवर्णवर्जाः। अवर्णरहिताः स्वरा इकारादायः नामिसंज्ञा उच्यन्ते। उक्तानुवादपूर्वकमुत्तरग्रन्थं संबध्नाति अनुक्रान्तास्तावत् स्वरा इति। तावदादौ स्वराः अनुक्रान्ताः परिपाट्या प्रकाशिता इत्यर्थः। परिपाटी अनुक्रम इत्यमरः। प्रथमतः आकारादयः पश्चादेकारादय इत्यनुक्रमेणोक्ताः। इदानीं प्रत्याहारजिग्राहयिषया ग्राहयितुमिच्छा जिग्राहयिषा। प्रत्याहाराणां जिग्राहयिषा प्रत्याहारजिग्राहयिषा तथा हेतुभूतया व्यंजनानि हकारादीनि अनुक्रामति

वक्ष्यमाणपरिपाट्या निर्दिशति ॥५॥

**६. ह य व र ल । ञ ण न ङ म । झ ढ ध घ भ । ज ड द ग ब । ख क छ ठ थ । च ट त क प । श ष स॥**

इतिदं वर्णोद्दिशतया कार्यविधायकं आद्यन्ताभ्यामित्यनेन लब्धसंबन्धसूत्रम्। तत्र हकारादारभ्य सकारपर्यन्तम्। ते यावन्तो वर्णास्तावन्ति सांकेतकानि पृथक् प्रथमैकवचनान्तानि पदानीति ज्ञेयम्।

**७. आद्यन्ताभ्याम् ॥१.६॥**

तृतीया द्विवचनान्तमेकपदं नियमविधायकं सूत्रम्। प्रतिकार्यमाह्रियते इति प्रत्याहारः। तं जिघृक्षता गृहीतुमिच्छता पुरुषेण आद्यन्ताभ्या(4-b)माद्यन्तवर्णाभ्यां सह एते हयवरलेत्यादिक्रमेण परिगणिता वर्णाः ग्राह्याः। आद्यन्ताभ्यामिति द्विवचनं जात्यभिप्रायेण। तेन प्रतिप्रत्याहारमाद्यन्ताभ्यामिति संबध्यते। प्रत्याहारणां नामानि ज्ञापयितुमाह। आदिवर्णोऽन्त्येन गृह्यमाणस्तत्र प्रत्याहारः इति कार्यपेक्षया यः कश्चिदादिवर्णः येन केन अन्त्येन वर्णेन गृह्यमाणः। तथा आद्यन्तवर्णात्मकं यन्नामवद्भवति तन्नाम प्रत्याहारो भवति। अथवा आदिवर्णः अन्त्येन गृह्यमाणः प्रत्याहारो भवति। किं लक्षणः प्रत्याहारः?। तन्नामा स अन्त्येन सहोच्चार्यमाणः आदिवर्णः नाम यस्य स तन्नाम इति। तौ आदिवर्णान्त्यवर्णौ नाम यस्य स तन्नामा इति व्याख्येयम्। तमेव प्रत्याहारं विशेषतो दर्शयति। तथा हि अकारो बकारेण गृह्यमाणोऽबप्रत्याहारः। स च एतावत्संख्याकः अ इत्यारभ्य बपर्यन्तम्। एतावत्संख्याकः। एतावद्वर्णसंख्याकः संपद्यते संपूर्णो भवति। झ ढ ध घ भेति झभः। ज ड द ग बेति जबः। च ट त क पेति चपः। एतावत्संख्याकः संपद्यत इति सर्वत्रानुसन्धेयम्। न त्वेते एव प्रत्याहारा इत्याशंक्याऽऽह। एवं यत्रेत्यादि। एवम् उक्तप्रकारेण येन येन प्रत्याहारेण यत्र यत्रोदाहरणे कृत्यं कार्यं भवति स स तत्र तत्र ग्राह्यः। तु पुनः संख्यानियमो नास्ति। यथा ग्रन्थान्तरे ते च प्रत्याहारा एकचत्वारिंशदिति तथाऽत्र संख्यानियमो न कृतः। यथाकार्यम् अनुसंधेय इत्यभिप्रायः। अथ हकारादि सकारान्तानां वर्णानां आद्यन्ताभ्यामिति हस संज्ञामाह। हकारादय इत्यादि। हकारादयः सकारान्ताः अत एव हसा वर्णाः व्यंजनानि। व्यंजनसंज्ञा भवन्तीत्यर्थः। व्यंजनलक्षणमाह स्वरहीनं व्यंजनमिति स्वरेण हीनं स्वरहीनम्। इत्युक्ते नाम्नीति तस्यापि व्यंजनत्वापत्तेः स्वरेभ्यो हीनमित्यादि व्याख्येयम्। अथवा ह्येकयोर्द्विवचनैकवचने इत्यादिवत् भावप्रधानानिर्देशो मंतव्यः। तेन स्वरत्वहीनं व्यंजनमित्यर्थः। ननु ह य व र लादिषु अकारस्य विद्यमानत्वात् कथं व्यंजनत्वमित्याह। तेष्वकार इत्यादि। तेषु हकारादिषु ह य व र लादिषु वर्णेषु वर्तमानो अकारः स सुखेन उच्चारणं सुखोच्चारणं एतत् अर्थः प्रयोजनं यस्य स तथा त (5A)स्य भावस्तत्त्वं तस्मात् सुखोच्चारणार्थत्वात् इत्संज्ञको भवति। एतीति इत् गत्वर इत्यर्थः। केवलं हसानां व्यंजनानां उच्चारतया अकारसंयुक्तानां सुखोच्चारणार्थत्वमुपपन्नम्। इकारादिसंयुक्तेषु हकारादि(षु) हि यि वि रि हु यु वु रु इत्येवंरूपा उच्चारता स्यात्। एतदर्थम् अकार एव सुखोच्चारणार्थ इति भावः। इत्संज्ञाविधायकं सूत्रमाह ॥७॥

८. **कार्यायेत्॥**

कार्याय। इत्। (२।) इत् प्रत्ययाद्यतिरिक्तः प्रत्ययादिभ्यो अतिरिक्तोऽभ्यधिकः। कास्मैचित्कार्याय सुखोच्चारणाय स्थानविध्याद्यर्थं वा उच्चार्यमाणो वर्ण इत्संज्ञो भवति। आदिशब्दात् आदेश-आगम-नामधातु-प्रत्याहारेभ्योऽधिक इति ज्ञेयम्। इत्संज्ञाप्रयोजनमाह। यस्येत्संज्ञा तस्य लोपः। इत्संज्ञासंकेतितस्य लोप इत्यर्थः। अन्यथा तत्त्वविदित्यादौ इदित्यस्य लोपःप्रसज्येत । तदर्थं यस्य इत्संज्ञा विहिता तस्य इत्संज्ञाविशिष्टस्यालोप इत्याशयः लोपस्वरूपमाह ॥८॥......................

**(९०-b) लक्षेरीमुट् च॥१३.८६॥**

लक्षेः लक्षदर्शनीकनयोरित्यस्य धातोः रीप्रत्ययो भवति। तस्य च गुडागमो भवति। टित्वादादौ। लक्षयतीति लक्ष्मीः। इबन्तत्वा भावान्न सि लोपः। स्यायते स्त्री त्वेद्रट् स्यायतेर्धातोः स्त्रीत्वेऽभिधेयडत्रट् प्रत्ययो भवति। द्यै स्त्रै शब्दसंघातयोः डेत्रट् प्रत्ययः डित्वात् टिलोपः। स्परा इति स्थिते य्वोर्वि हसे इति यकार लोपः। यथा देदेवीत्यादौ वकारलोपः। तथा इहापीति केचित्। अन्त्येनुडेकार द्वित्वमाश्रित्यत बलात् यकारलोपमिच्छन्ति। परे उक्तस्य यानमेन विषयत्वात् यतं इत्यनेन यलोपमिच्छन्ति। केचित्तुरसे परत्वात्। संयोगात् लोपमिच्छन्ति। केचितु रसपरत्वात् संयोगान्तलोपं वाछंति। टित्वात् ईप् हसेपः सेर्लोपः । स्त्रीवर्णात्कारः। अकारादि ऋकारान्तेषु वर्णेषु वर्णतया निर्देश्यमाणावर्णात् कार प्रत्ययो भवति। अकारः इकारः ककारः खकार इत्यादि पदत्वे न निर्दिष्टा वर्णा भवति। यथा अः विष्णुः। इः कामः। कः प्रजापतिः। खमाकाशम्। बः ब्रह्माः इत्यादौ। फौवार इत्येतस्मात् इफ प्रत्ययो वा भवति। अ इ ए। रेफः पक्षे रकार इति प्रयोगे संमति दशति दर्शयति।

**रकारादीनि नामादि शृण्वतो ममपार्वति।**
**मनः प्रसन्नतामेति रामनामाभि शंकयेति ॥**

किमयं राम उद्धारयेदिति। अभिशंकया आशंकया रकारादीनि नामानि शृण्वतो मम मनः प्रसन्नतामेति।

**लोकाच्छेषस्य सिद्धिः ॥१३.८९॥**

इति उपसंहारसूत्रम्। शेषस्य सिद्धिर्लोकात् । अन्य व्याकरणाद् द्रष्टव्याः। यथामातरपितरावित्यादेः सिद्धिः। अत्र समाप्ति सूत्रे सिद्धिरिति। मङ्गलार्थप्रयोगापि दर्शितः। उपसंहार सूत्रम्। शेषस्य सिद्धिर्लोकात्। अन्य व्याकरणा (९१-a) द्द्रष्टव्याः। यथा मातरपितरादित्यादः सिद्धिः। अत्र समाप्ति सूत्रे मङ्गलार्थ प्रयोगापि दर्शितः । मङ्गलान्तानि शास्त्राणि भवन्तीत्युक्तत्वात्। अधुना श्रोतॄणां अभिमतार्थ सिद्धये श्रोतॄणां अभिमतार्थ सिद्धये। इष्टदेवता प्रसादमाशास्त्रो अवताद्वो हयग्रीवः कमलाकर ईश्वरः।

सुरासुरनराकारामधुपापीतपत्कजः। हयस्य ग्रीवायस्य सह हयग्रीवः। इष्टे जगति इति ईश्वरः। कमलायाः लक्ष्म्याः आकारः। अथवा कमलासपदोरैक्यात् स पक्करः। सुरादेवाः असुरादैत्या। नरे मनुष्याः। सुरा सुरनराकाराये मधुपाभ्रमराः। तैः आपीते सेवया उपभुङ्क्ते रसे ध्यानदृष्ट्वा सादरमवलोकिते वा। पत्कजे चरणकमले यस्य सः वः युष्मान् अवतात्। पापादित्यर्थके उदके जायत इति। कजं कमलं भ्रमरादि कमलरसं पिबन्तीति। सुरादीनां भ्रमरकथनं रसास्वादि क्रियाति बन्धनं चरणयोस्तु कमलद्वारोपः। सादृश्यमूलएवेति ज्ञातव्यम्। अथ अलङ्कारश्लोकं रवति स्वरूपान्तोऽनुभूत्यादि शब्दौ भूद्यत्र सार्थकः। समस्करी शुभां चक्रे प्रक्रियां च उरोवितामिति आते अस्य स्वरूपान्तः अनुभूरितित्यादिर्यस्य स अनुभूत्यादि। अनुभूतिस्वरूपाः। इत्येवमुच्चार्यमाणः शब्दः यस्मिन् सार्थकः अभूत् अनुभूतिस्वरूप इति। नाम तः साक्षादनुभूतेः स्वरूपमित्यर्थतोऽपि कृतकृत्य आसीत्। स मस्करी समस्करो वेणुः वेणुमत्करते जना इत्यमरः। सोऽस्यास्तीति मस्करी सन्यासी इमां च उरोचितां प्रक्रियां चक्रे विदधे इत्यन्वयः। इति प्रसन्नयाता विदिव्यार्थमशंशयम्। टीका सा टीका सारस्वतस्येऽयं यथा मतिविनिर्मिता॥१॥

**इति श्रीमालकुल श्रीमालला रसालवमण्डलालङ्कार श्रीपुंजराजविनिर्मिता सारस्वतटीका सम्पूर्णाः॥श्री॥**

◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆